॥ तैत्तिरीयव्यासतीर्थीयटीकाप्रारंभः ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रीमद्भनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐ ॥ रमारमणमानम्यपूर्णबोधमनंतरं । तैत्तिरीयोपनिषद्भाष्यसंबंधःक्रियतेमया ॥ १ ॥ तैत्तिरीयोपनिषदंयथावद्याचिख्यासुर्भगवानानंदतीर्थमुनिःनिर्विघ्नेनपरिसमाप्त्याद्यर्थं तदुक्तगुणवंतंभगवंतंशिष्यशिक्षाशयेनस्तौति ॥ सत्यमिति ॥ सत्यंज्ञानमनंतंब्रह्मेतिसत्यत्वादयः यदेषआकाशआनंदोनस्यादित्यानंदः सोकामयतबहुःस्यांप्रजायेयेत्याद्युक्तसर्वसृष्ट्युपयुक्तसर्वशक्तिश्चोक्ताज्ञातव्या ॥ एकं आनंदोब्रह्मेतिव्यजानादित्याद्युक्तस्वगुणाद्यभिन्नं । एतदुपनिषत्प्रवर्तकब्रह्मादिभिर्देवैरीड्यं । ब्रह्मचविष्णोरन्यन्निर्गुणंनमंतव्यमितिभावेनोक्तं विष्ण्वाख्यमिति । ऋषिच्छंदोदैवतान्यज्ञात्वाविद्याभ्यासिनो योहवाअविदितार्षछंदोदैवतब्राह्मणेनमंत्रेणयजतियाजयतिवाध्यापयतिस्थाणुंवर्च्छतिगर्तेवापद्यतिप्रवामीयतेपापीयान्भवतीत्यनर्थोक्तेरेतदुपनिषदःऋषिदेवतेआह ॥ आदित्येत्यादिना ॥ यथाचवरुणो ब्रह्मोक्तप्रकारेणहरिंतुष्टावेत्यध्याहार्यं । वरुणायब्रह्माप्राहेत्यनुक्तत्वा त्तत्कथनपूर्वं तथाप्राहशन्नोमित्रादिकाश्रुतिरित्युक्त्याब्रह्मादिभिःकृतास्तुतिरन्या शन्नोमित्रादिकातुतत्समाख्येतिप्रतीतिंनिवारयन्नाह ॥ यदुवाचेति ॥ उवाचब्रह्मणइतिशेषः । नन्वन्नमयाद्याःपंचोच्यंतेस्यामुपनिषदि नतुहरिरित्यतआह ॥ पंचात्मकमिति ॥ कथंतर्ह्यन्नमयइतिमयट्हरौघटतेइत्यतउक्तं ॥ पूर्णमिति ॥ प्रचुरान्नादिमंतमित्यर्थः । शन्नोमित्रादिभिरित्यस्याउपनिषदउपक्रमउक्तः । मुक्तगीतेत्येतत्सामगायन्नास्तइत्यवसानमुक्तं । विष्ण्वादिरस्याऋषिः छंदोयथासंभवंअनुष्टुबादि हरिर्देवता । ननुविष्णुरस्याऋषिरुपनिषदइत्युक्तं । तस्यशन्नोमित्रइति नमस्तेवायोइति । सुखप्रार्थननमस्कारायोगादित्यतआह ॥ भृग्विति ॥ एतन्न्यायमन्यत्राप्यतिदिशति ॥ एव

मिति ॥ ब्रह्मविद्यामनुतिष्ठन्भृगुर्विघ्नपरिहारार्थंदेवान्प्रार्थयते ॥ शन्नोमित्रइत्यादिना ॥ मित्रः नः शं सुखप्रदोभवत्वित्यादि योजनाद्रष्टव्या । वायोर्ब्रह्मविद्याप्रवर्तकेषुमुख्यत्वात्परब्रह्मणोमुख्याधिष्ठानत्वाच्चतंस्तुवन्पृथक्प्रार्थयते ॥ त्वमेवेति ॥ अक्षमक्षं प्रतिस्थितंप्रत्यक्षं। ऋतंयथार्थज्ञानवंतं। सत्यं यथार्थज्ञानपूर्वकंवक्तारंकर्तारंच। दिव्यांतरिक्षभौमविघ्नपरिहारार्थंशांतित्रिरुक्तिः॥१॥ ब्रह्मविद्याभ्यासार्थिनःपूर्वंशिक्षणीयमर्थंवदन्नाह ॥ शीक्षामिति ॥ शिक्ष्यतइतिशीक्षा शिक्षणीयमर्थमित्यर्थः । वर्णः वर्णानामुच्चारणस्थानानि ज्ञातव्यानि । स्वर उदात्तादिः । मात्रा एकमात्रादिः । बलं वर्णोच्चारणप्रयत्नः । साम वर्णानांसंधिः । संतानः वर्णानांपरंपरा । शिक्षणीयाएतेज्ञातव्याइत्यर्थः । वर्णाद्युच्चारणस्थानादीनिज्ञातव्यानीत्युक्त्यास्याब्रह्मसंबंधित्वंनास्तीतिप्रतीयते । तांनिवारयन्नाह ॥ वरणीयइत्यादिना ॥ मानात्ज्ञानात् वर्णादिशब्दोभगवद्वाचकइतिनिरुच्यदर्शितं । तदागमेनद्रढयति ॥ वर्णेति ॥ तस्येयंयोजना । वर्णादि विष्णोर्यस्यस्वरूपस्यप्रतिपादकं तद्वर्णादिवाचकंरूपं । वर्णादिनामकं वर्णःस्वरइत्यादिनामकंज्ञेयं । पुंसुतत्तत्क्रियाप्रदं वर्णाद्युच्चारणक्रियाप्रदं । आदावेवविघ्नाभावप्रार्थनेकृतेपिप्रतिविघ्नंविघ्नाभावः प्रार्थनीयइतिभावेनाथातइतिवक्ष्यमाणविद्याविघ्नाभावंप्रार्थयते ॥ सहनौयशइति ॥ समित्रादिः नौ गुरुशिष्ययोर्यशस्करं ब्रह्मवर्चसकरंभवतु । सामेतिप्रकृतवर्णसंधिनिष्ठांब्रह्मविद्यांवदन्नाह ॥ अथेति ॥ वर्णादिशिक्षणादनंतरं । अधिकरणेषु प्रकरणेषु । अधिकरणान्येवाह ॥ अधिलोकमित्यादिना ॥ लोकमधिकृत्याधिलोकं इत्यादियोज्यं ॥ ३ ॥ अधिलोकमित्याद्युक्तं विवृणोति ॥ अथाधिलोकमित्यादिना ॥ पृथिवीपूर्वरूपंद्यौरुत्तररूपमित्यादौपृथिव्यादेःपूर्ववर्णत्वंद्यादेरुत्तरवर्णत्वंप्रतीयते

GDF Sri Gargeshwari Digital Foundation

तदनुपपन्नं । तत्तद्देवतापरत्वेतुनब्रह्मविद्यात्वं । अतस्तद्यथावद्व्याकरोति ॥ **नारायणादीति** ॥ तथासंहितायाःसंधौसन्निकर्षे संधानेसंधिकार्येचतिष्ठंतीतिध्येयानीतिशेषः । उक्तविद्यांफलेनरोचयति ॥ **यएवमिति** ॥ तद्वाक्यं स्वर्गपरत्वप्रतीतिंवारयन्व्याचष्टे ॥ **यइति** ॥ ४–८ ॥ विद्यार्थिनोमेधयाभाव्यं तदर्थकांचनविद्यामाह ॥ **यइति** ॥ अमृतात् अमृतेभ्योनित्येभ्योअधिसंबभूव । इंद्रःपरमैश्वर्यवान् स्पृणोतु बलयतु। अमृतस्यवेदस्य धारणोभूयासं धारकोभूयासं विचर्षणं विशिष्टप्रजावत्। प्रजावाचकचर्षणशब्दोज्ञानशिष्यान्यतरप्रजावाचकः । तद्व्याचष्टे ॥ **यइति** ॥ अमृतस्यधारणोभूयासमित्यस्याभिप्रायमाह ॥ **तत्त्वविज्ञानीति** ॥ ममवेदाभावेतद्विषयमेधाभावेवाकथंमत्तःतत्प्रार्थनंतत्राह ॥ **ब्रह्मणःकोशोसिमेधयापिहितइति** ॥ तद्व्याचष्टे ॥ **वेदेति** ॥ ९ ॥ अभ्यस्ताचविद्याशिष्येभ्योदत्तैवाधिकफलप्रदाभवति । शिष्याभावेचतदभावोतःशिष्यसंपत्त्यर्थंकांचनविद्यामाह ॥ **आमेति** ॥ मांप्रतिब्रह्मचारिणःआयांतु । विविधाः प्रकृष्टाः दमाइंद्रियनिग्रहयुक्ताः शमाविष्णुनिष्ठायुक्ताः शिष्यागमनार्थंयशोयशस्वी वस्यसः सुखविषये । तंत्वाभगप्रविशानीतिब्रह्मणिप्रवेशउक्तः तस्यप्रयोजनमाह ॥ **तस्मिन्निति** ॥ भग तस्मिन्सहस्रशाखेत्वयिप्रविष्टोहंपापंनिमृजे प्रक्षालये । तत्रभगसहस्रशाखाशब्दार्थावप्रतीतेराह ॥ **भगइति** ॥ ११ ॥ मेधाविनोप्यन्नाद्यभावेमनःक्षोभेणविद्यासम्यङ्नसिद्ध्यति । तदर्थकांचनविद्यामाह ॥ **आवहंतीति** ॥ तांब्रह्मविद्यांस्फोरयन्व्याचष्टे ॥ **आवहंतीति** ॥ योजनातु आत्मनोजीवजातस्य चीरंचिरं सर्वभोगानावहंती वितन्वानासनातनी ममवासांसिगावश्चान्नपानेचकुर्वाणायतः अतः हे गोविंद लोमशांसुशिखंडोपशोभितांतांश्रियंमय्यावह ॥ १० ॥ शिष्याश्चाप्रयत्नेनायांत्विति

SGDF
Sri Gargeshwara Digital Foundation

सदृष्टांतमाह ॥ यथापइति ॥ प्रवता निम्नदेशं । अहर्जरं संवत्सरं । मासायथाप्रतिष्ठंते । प्रतिवेशः प्रवेष्टुंयोग्यः ॥ १२ ॥ वेदविद्याभ्यासार्थिनांतत्प्राप्त्यर्थंपूर्वभाविनीव्याहृतिनिष्ठोपास्तिरुक्ताभूर्भुवःसुवरिति । तांब्रह्मपरत्वाप्रतीतेर्व्याचष्टे ॥ भूरित्यादिना ॥ माहाचमस्यःब्रह्मा । तद्रूपचतुष्टयं ब्रह्म । भूरादिचतूरूपोभगवानित्युक्तं तथाचकिंकर्तव्यमित्यतः सआत्माअंगी अन्यादेवताःभूराद्याः अंगानिइतिचिंत्यमित्युक्तं । तद्व्याचष्टे ॥ देहेत्यादिना ॥ ननुभूरादीनांभगवतश्चपरस्परमभेदात्कथमन्यइत्यन्यत्वोक्तिरित्यतआह ॥ अनन्यइति ॥ भेदाभावेकथमन्यत्वोक्तिरित्यतआह ॥ संख्येति ॥ भेदाभावेपिसंख्याविशेषयुक्तत्वादन्यत्वोक्तिर्युक्तेत्यर्थः ॥ १३ ॥ भूरादिवाच्यानांअनिरुद्धादीनांअधिष्ठानमाह ॥ भूरितिवाअयंलोकइत्यादि ॥ तद्व्याचष्टे ॥ लोकइत्यादिना ॥ अनिरुद्धादिरूपोभगवाँल्लोकादिषुष्टिततीत्यर्थः । आदित्येनवावसर्वेलोकामहीयंतइत्यादेरर्थमाह ॥ महीयतइति ॥ पूज्यपूजकभावेपिनलोकवद्भेदःशंकनीयइत्याह ॥ पूज्येति ॥ लोकादिषुतिष्ठतिचेत्कथंभूरितिवायं लोकइतिसामानाधिकरण्यव्यपदेशइत्यतस्तद्घटयन्नाह ॥ नामेत्यादि ॥ लोकादिकंशब्दजातंहरेर्नाम कुतः तत्तन्नामप्रवृत्तिहेतुभावात् । लोकादिषुस्थितत्वाच्च । अतःसामानाधिकरण्ंयुक्तमित्यर्थः । नामप्रवृत्तिहेतुभावमेवदर्शयति ॥ अयमित्यादिना ॥ ब्रह्मणामनेकत्वात्महइतिब्रह्मेत्युक्तंकिमितिनज्ञायतेऽतआह ॥ वेदानामिति ॥ भूतैरद्यतइत्यन्नमिति । उपजीव्यतः उपजीव्यत्वात् । एवंताएताश्चतस्रोव्याहृतयः प्रत्येकंचतुर्धा याःप्रत्येकंचतस्रश्चतस्रोव्याहृतयः । तायोवेदेत्यत्रव्याहृतिवेत्तुःसर्वदेवोपास्यत्वंफलमुक्तं । तद्यस्यकस्यापितद्वेत्तुःप्रतीयते तदुपक्रमाननुगुणमितिदर्शयन्व्याचष्टे ॥ एवमिति ॥ अंगान्यन्यादेव

ताइतिभूरादयोभगवतोंगानीत्युक्तं तच्छुत्यासमर्थयते ॥ तस्येति ॥ सर्वव्याहृतिवेत्ताब्रह्मेत्युक्तमयुक्तं । एतांचतुर्थींप्रवेदयतइति विशेषोक्तेरित्यतआह ॥ सर्वेति ॥ इतिहेतोर्विशेषतःएतामितिविशेषोक्तिर्घटतइत्यर्थः । भूरादिशब्दाःकयावृत्त्याभगवतिप्रवर्ततइतिजिज्ञासायांरूढियोगेनेत्याह ॥ भूर्नामेति ॥ तद्ब्रह्मेत्येतद्व्याचष्टे ॥ तदेतदिति ॥ सआत्माअंगान्यन्यादेवताइत्येतत्प्रकारांतरेणव्याचष्टे ॥ सइति ॥ आगंतुकत्वादंगंगुणभूतं । भूरितिवाअयंलोकइत्यादि भूरादिषोडशात्माभगवानितिव्याख्यातं । तत्रप्रमाणांतरंपठति ॥ वासुदेवेति ॥ महइतिब्रह्मेत्यस्यार्थः सएवेति । सर्ववेदोक्तत्वंविशदयन्नाह ॥ प्रणवेति ॥ व्याहृतिषुव्याहृतिशब्दप्रवृत्तिनिमित्तंनिरुच्यदर्शयति ॥ सम्यगिति ॥ सम्यगित्युक्तंविशदयन्नाह ॥ सर्ववेदेति ॥ उएव व्याहृतेरेव । प्रकारांतरेणनिर्वक्ति ॥ विशेषेणेति ॥ आहरंति भक्तंप्रतीतिशेषः ॥१४॥ भूरादिनाम्नोऽनिरुद्धादेर्देहेचोपास्तिमधिष्ठानपूर्वमाह ॥ सयइत्यादिना ॥ मनोमयोज्ञानमयः । हिरण्मयः सुखमयः । अंतरेणमध्ये । तद्व्याचष्टे ॥ यएषइति ॥ तालुकमेवनामांतरेणोक्तं । यएषस्तनइवावलंबते सेंद्रयोनिरिंद्रस्यस्थानमिति । तदर्थमाह ॥ लंबिन्यामिंद्रनामकइति ॥ यत्रासौकेशांतोविवर्ततइत्येतद्व्याचष्टे ॥ व्याख्यइति ॥ सुपर्णरूपत्वाद्धिः व्याख्यः । यस्सुपर्णात्मासंकर्षणः । असौकेशांतेकेशमूलेवर्ततइति । व्यपोहीत्येतत्सयुक्तिकंव्याचष्टे ॥ वासुदेवइति ॥ तस्यस्थानमाह ॥ अशीर्षकपालइति ॥ तद्व्याचष्टे ॥ अशीर्षेति ॥ १५ ॥ चतुर्णामन्यत्रोपास्तिमाह ॥ भूरित्यादिना ॥ तद्व्याचष्टे ॥ अनिरुद्धइत्यादिना ॥ परिच्छिन्ने ब्रह्मणिस्थितोवासुदेवोपिपरिच्छिन्नःकिंइत्यतोनेत्याह ॥ आप्नोतीति ॥ स्वाराज्यंजगत्आप्नोति व्याप्नोति । यतआप्नोति

मनसस्पतिंचाप्नोति । ततोवाक्पतिःचक्षुष्पतिःश्रोत्रपतिर्विज्ञानपतिःएतत्ततोभवतीति । तद्व्याचष्टे ॥ सइति ॥ १६ ॥ वासु देवस्यगुणानाह ॥ आकाशशरीरमित्यादिना ॥ तद्व्याचष्टे ॥ आकाशवदिति ॥ प्राणारामइत्यस्यार्थांतरमाह ॥ बलेति ॥ आनंदादिगुणानतस्माद्भिन्नाइत्युक्तं मनआनंदमिति । तद्व्याचष्टे ॥ ज्ञानेति ॥ सुखोन्नतिश्चनान्यप्रसादादित्युक्तं ॥ समृद्धमिति ॥ तद्व्याचष्टे ॥ अंतगत्वादिति ॥ स्वतःस्वस्मात्स्वभावादेवपूर्तेरंतगत्वात्समृद्धं । इतिप्राचीनेत्येतदप्रतीते र्व्याचष्टे ॥ इतीति ॥ मदुपासनेप्रथमोयोग्यस्त्वमितिप्रकारेणोपास्व । प्रथमयोग्यत्वेनिमित्तमाह ॥ प्राधान्यादिति ॥ १७ ॥ वेदविद्याप्राह्यर्थंपूर्वभाविविद्यांतरमाह ॥ पृथिवीत्यादिना ॥ एतदधिविधायाधिकृत्य स्पृणोति बलयति । तद्व्याचष्टे ॥ पृथिव्याद्यामिति ॥ पाङ्तंपंचत्वसंख्यायुक्तं । आत्मनोध्यात्मत्वात्कथमधिभूतत्वंतस्येत्यतस्तद्धटयन्नाह ॥ आत्मेति ॥ १८ ॥ वेदविद्याभ्यासार्थिनःपूर्वभाविनींप्रणवविद्यामाह ॥ ॐमितिब्रह्मेति ॥ तद्व्याचष्टे ॥ ॐमिति ॥ नकेवलमेकमेवरूपंभगवतः पूर्णत्वेनप्रणववाच्यं । अपितर्हिसर्वमपीत्युक्तं ॥ ॐमितीदंसर्वमिति ॥ तद्व्याचष्टे ॥ यद्यदिति ॥ भगवतःप्रणववाच्यत्वं कुतइत्यतोभगवंतमुद्दिश्यकर्मादिकुर्वद्भिःनियमेनतदादौप्रणवस्यानुष्ठीयमानत्वादितिभावेनप्रवृत्तमोमित्येतदनुकृतीत्यादि । ओ श्रावयेतिमंत्रेण आश्रवयतीत्यत्रओकारएव नत्वोमित्यतउक्तं ॥ ॐमित्येतदनुकृतीति ॥ ॐमित्येतस्यानुरूपमिति । तद्वाक्य जातंव्याचष्टे ॥ तस्मादित्यादिना ॥ प्रणवस्यहरिवाचकत्वात् । तस्माद्यज्ञेष्वित्युक्तमेवविशदयन्नाह ॥ अधिकेत्यादिना ॥ अध्वर्युर्होतरिस्थितंहरिं ॐ अधिकोच शृणुष्व श्रावय मूलरूपमित्याहहि अध्वर्युः ओधामोदेवेतिप्रतिगरंमंत्रंप्रतिगृणातीत्येत

GDF Sri Gargeshwari Digital Foundation

ख्याचष्टे ॥ अधिकोचेति ॥ ओधामोदेव इत्येतेषांक्रमादर्थाज्ञेयाः । ॐशोंशावोंइत्यादिशस्त्राणिशंसंतीत्येतद्व्याचष्टे ॥ शंरूपात्युच्चशावनेति ॥ अत्रपदविभागः शंरूप अत्युच्चश अवनेति ॐश ॐश ॐअव इत्यत्रप्रथमप्रणवोधिकोचेतिपूर्वोक्तार्थः। इतरेषांक्रमादर्थाज्ञेयाः। अन्येपिऋत्विजः तथैव ॐमित्युच्चार्यैवसामादीनिगायंति । ॐमितिब्राह्मणःप्रवक्ष्यन्व्याकुर्वन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोतीत्येतत्प्रणवविद्याफलवचनं। तद्व्याचष्टे ॥ एवंजानंतइति ॥ १९॥ वेदाख्यब्रह्मविद्याकामस्यतत्प्राप्त्यर्थंपूर्वभाविनियमाश्चोच्यंते । ऋतंचस्वाध्यायेत्यादिना। तत्राध्याहार्यभागंअन्वयंदर्शयन्नाह ॥ ऋतंचेति ॥ प्रकृष्टवचनंसाधुभाषणंप्रवचनमितिप्रतीतिंवारयन् ऋतत्वसत्यत्वयोरेकार्थत्वप्रतीतिनिरासायप्रवचनादिशब्दान्व्याचष्टे॥प्रवचनमित्यादिना॥ ऋतसत्यपदव्याख्यानंप्रमाणेनद्रढयति ॥ ऋतमिति ॥ तत्पूर्वकवचनंचसत्यमितिशेषः । तपःशब्दस्यसंतापेप्रसिद्धत्वादत्रविवक्षितंतपःशब्दार्थमाह ॥ ध्यानेति ॥ ऋतसत्यादिषुस्वाध्यायप्रवचनयोरनुषंगेकारणमाह ॥ सर्वेति ॥ प्रतिदिनंस्वाध्यायप्रवचनेकुर्यादित्यर्थः । सर्वकर्मकृतिकालेपिस्वाध्यायप्रवचनयोःकर्तव्यत्वमुक्तं । तत्प्रमाणेनद्रढयति ॥ मंत्रोवेदाध्ययनमिति॥ मंत्रार्थवचनं वेदव्याख्यानमात्मनोवाकर्तव्यमित्युक्तं। तदयुक्तं । प्रवचनस्यशिष्यापेक्षत्वादित्यतआह ॥ आत्मनइति॥ अप्रतीतेर्मानुषशब्दार्थमाह ॥मानुषमिति॥ ज्ञानाद्यतिशयेपिनमानुषधर्मस्त्याज्यइतिभावः । एतदेवाचारेणसमर्थयते ॥ देवा इति ॥ प्रजाप्रजननप्रजातिशब्दानेकार्थप्रतीतिंवारयन्व्याचष्टे ॥ प्रजायाइति ॥ प्रकृष्टजातिःद्विजत्वादिः ॥२०॥ ऋतसत्यादीनांश्रेयःसाधनत्वंसमं एकस्यवाधिकमित्यपेक्षायामृषिमतान्याह ॥ सत्यमित्यादिना ॥ उक्तानामृषिमतानांसाम्यमुतएक

SGDF
Sri Gargeshwari Digital Foundation

स्यातिशयइत्यपेक्षायामादिमतद्वयंसमं तृतीयमतिशेतइत्याह ॥ **सत्यइति** ॥ स्वाध्यायप्रवचनयोःऋतादेःसर्वस्याप्यंतर्भाव उक्तः । तंश्रुतिस्मृतिभिःसाधयति ॥ **यंयमिति** ॥ ऋतुं ज्ञानकारणंशास्त्रं अधीतेध्यापयतिच । जप्येन वेदपाठादिना । मित्रदेव ताकसर्ववेदात्मकगायत्रीजपवान्मैत्रोतोअन्यकरणाभावेपिजप्येनैवसंसिध्येत् ॥ २१ ॥ ऋतादेःसर्वस्मात्स्वाध्यायप्रवचनयोःश्रे ष्ठत्वमुक्तं तदाख्यायिकयादर्शयति ॥ **अहमिति** ॥ अस्यार्थःगिरेःपृष्ठमिवममकीर्तिर्जातासंसारवृक्षच्छेत्तृत्वादिकंस्वसामर्थ्या देवकिमित्यतोभगवत्प्रसादादित्युक्तं ॥ **ऊर्ध्वेति** ॥ सवर्चसंद्रविणं सुवर्णमिवाहंजातः वेदानुवचनं वेदव्याख्यानफलं । अप्रतीते स्तद्वाक्यंव्याचष्टे ॥ **संसारेति** ॥ तेनामृतेनेत्येतत्पूर्वं सुमेधाश्चास्मीतिग्राह्यं । तेनामृतेनसिक्तोहंइत्यस्यविवरणंतेनव्याप्तइति ॥ २२ ॥ वेदश्रवणानंतरभाविनोयमनियमानाह ॥ **वेदमनूच्यव्याख्यायेत्यादिना** ॥ उपलक्षणत्वेनोक्तंसत्यादिकंसर्वथाक र्तव्यमितिभावेनपुनराह ॥ **सत्यादित्यादिना** ॥ कुशलात्व्यापारात् । माता देवइवपूज्या यस्यासौमातृदेव इत्यादिज्ञेयं । अश्रद्धयापिदेयमेव । नतुगुणभूतश्रद्धाभावेप्रधानदानाकरणं ॥ २३ ॥ मांविहायदेशांतरंगतस्यतेकर्मविचिकित्सा यज्ञा दिकर्मसंदेहः । वृत्तं तदंगमाचारः । युक्ताःयोगयुक्ताः । आयुक्ताःआग्रहयुक्ताः स्वधर्मे । अरूक्षाः कोपरहिताःप्रश्ने । अभ्याख्यातेषुनिं दितेषु । यदिविचिकित्सास्यादितिवर्तते । एषआज्ञाहरेः नकेवलंआदेशः किंतुउपदेशः । नतस्ययादृशतादृशउपदेशः । किंतुएषा वेदोपनिषत् रहस्यं । एतन्ममचानुशासनं । अस्यादेशत्वादिभावात्सत्यत्वादिकमेवउपास्यमनुष्ठेयं । एतदेवावधारणेनपुनराह ॥ एवमिति ॥ २४ ॥ ययाशांत्याविघ्नोपक्रम्यपरिसमाप्ता । तामेवैषाविघ्ननिर्हरणेसमर्थेतिभावेनांतेपिपठति ॥ **शन्नोमित्रइति** ॥

अस्यांविद्यायांवायोरनुक्तत्वात्कथंआद्यंतयोस्त्वामेवप्रत्यक्षंब्रह्मवदिष्यामि त्वामेवप्रत्यक्षंब्रह्मावादिषं इत्युक्तिस्तत्राह ॥ **सं हितायाइति** ॥ अभिमानित्वं अभिमानिदेवतात्वं ॥ २५ ॥ **इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्यतै त्तिरीयोपनिषद्भाष्यस्यविवरणेश्रीमज्जयतीर्थपूज्यचरणशिष्यव्यासतीर्थकृतेप्रथमाशीक्षावल्लीसंपूर्णा ॥ १ ॥** यस्याःपूर्वकर्तव्याउक्ताः। तामेववक्तुं । विघ्नपरिहारकारिणींशांतिंपठति ॥ **सहनाविति** ॥ नौआवां । अवतुरक्षतु ।प्रविशतु । भुनक्तु पालयतु । वीर्यंव्याख्यानविषये । तेजस्विनौभवाव । अधीतंफलप्रदमस्तु ॥१॥ प्रधानब्रह्मविद्यामाह ॥ **ब्रह्मविदाप्नोतिपरमिति** ॥ तस्यार्थः ब्रह्मप्राप्तिकामोब्रह्मजानीयादिति । किंलक्षणकंब्रह्म कुत्रचतद्वेदनं किंचफलं इत्यतःप्रस्ताव्यक्रमेणाह ॥ **तदेषाभ्यु क्तेत्यादिना** ॥ तत्रसोश्नुतेसर्वान्कामानितिनिर्मर्यादंकामभोगःप्रतीयते । अन्यच्चब्रह्मणासहेतिसहशब्दात्ब्रह्मणोप्राधान्यं चातःतत्सर्वपरिहरन्नाह ॥ **स्वयोग्यमिति** ॥ राजपुरुषइत्यत्रराज्ञइवब्रह्मणःशब्दाप्राधान्यमेव नतुस्वरूपतइत्यभिप्रेत्यतद्व इयइत्युक्तं । मुक्तत्वात्सुखमेवभुङ्क्ते ॥ २ ॥ ब्रह्मसत्यमितिकेननिमित्तेनोक्तमित्यतः जगत्सद्भावप्रापकत्वात्स्रष्टृत्वादितिभावेन सृष्टिमाह ॥ **तस्मादित्यादिना** ॥ तस्मात्सत्यत्वादिलक्षणात् एतस्मा त्प्रकृतात् । स्वयंचाकाशादिनामा भूतनियामकत्वेन व्यूढइतिचग्राह्यं । सवाएषपुरुषोन्नरसमयइत्यत्रान्नशब्दवाच्यानांप्रसिद्धान्नाद्यत्वात्तृत्वादीनांमध्येअतिश्रेष्ठमद्यत्वमत्तृत्वंचसत्य शब्दार्थइत्याह । सभूतादिस्रष्टा । एषपुरुषोन्नरसमयइति । केचिदन्नात्पुरुषइतिपुरुषशब्देनोक्तप्राकृतदेहःपरामृश्यतइति । तन्नेति भावेनतद्व्याचष्टे ॥ **यएषइति** ॥ आकाशादिषुतन्नियामकतयाव्यूढःआकाशादिशब्दवाच्यः । सम्यक्काश्यत्वस्रष्टृत्वादिगु

PROOF
Sri Gargeshwari Digital Foundation

णाधिकः ॥ ३ ॥ अजातस्यजनिःकीदृशीत्यतआह ॥ **यतोविभुरिति** ॥ भगवतोन्नरसमयशब्दवाच्यत्वेनिमित्तद्वयमाह ॥ **अन्नस्येति** ॥ अन्नस्यात्तृत्वादेरन्नमयशरीरस्यचसाररूपोयंकेशवोतोन्नरसमयइत्यर्थः । अन्नरसमयस्यभगवतोवयवस्थिति स्थानमाह ॥ **तस्येदमेवशिरइत्यादिना** ॥ पुरुषस्यशिरआदिषुतस्यशिरआदिकंतिष्ठतीत्यर्थः ॥ पुच्छमिति ॥ लांगूलत्वप्र तीतिनिवारणायोक्तं प्रतिष्ठापादाविति ॥ ४ ॥ श्लोकेनाप्यन्नमयस्यप्रजास्रष्टृत्वादिमहिमानंवदन्नाह ॥ **तदपीति** ॥ तत्रस्र ष्टृत्वेएषवक्ष्यमाणश्लोकोपिभवतीत्यर्थः । प्रजास्रष्टृत्वाद्यन्नस्यवेत्तुःफलमाह ॥ **सर्वंवैतइत्यादिना** ॥ उक्तवेदनाप्रकारमेवाह ॥ **अन्नंहीत्यादिना** ॥ अन्नादिशब्दादन्नरसमयोन्यःप्रतीयते । तांप्रतीतिंवारयन्नाह । अन्नेति । अन्नकार्यत्वाच्छरीरेषुअन्नेषु । अन्नशब्दवाच्यत्वेभगवतोनिमित्तद्वयमाह ॥ **अद्यतेत्तिचेति** ॥ तद्वाक्यंप्रसिद्धान्नपरत्वप्रतीतिवारणायव्याचष्टे ॥ **अत्तृत्वा दिति** ॥ अन्नंहिभूतानांज्येष्ठंतस्मात्सर्वौषधमुच्यतइति । तद्व्याचष्टे ॥ **सज्यायानिति** ॥ भूतज्येष्ठत्वंकथंसर्वौषधत्वेकारण मित्यतोज्येष्ठत्वस्यभूताश्रयत्वनिमित्तत्वादितिभावेनतद्व्याचष्टे ॥ **संसारइति** ॥ दह्यमानानां उष्टानामितियावत् ॥ ५ ॥ अद्यत्वमत्तृत्वंचेदन्नशब्दार्थस्तर्ह्यन्नरसमयएवान्नं । तथाचकथंतत्रविकारार्थोमयट्उपपद्यतेइत्यतआह ॥ **प्रचुरमिति** ॥ प्रचुरैः बहुभिः । तस्यान्नस्येदमेवमनुष्यशिरएवशिरइतिसामानाधिकण्यप्रतीतिंवारयन्व्याचष्टे ॥ **देहस्येति** ॥ पश्चात्तनौ पादयोः । पुच्छंपादौ । प्राणनंचेष्टाप्रदत्वंचसत्यशब्दार्थइत्याह ॥ **तस्माद्वाएतस्मादन्नरसमयादित्यादिना** ॥ तत्प्राणप्रकरणंव्याचष्टे । **तस्यांतरमिति** ॥ अन्नरसमयादन्यइत्युक्त्यान्नरसमयात्प्राणमयस्यभेदःप्रतीयते । तांवारयति ॥ **अभिन्नमपिभिन्नवदिति** ।

SGDF
Sri Gargeshwari Digital Foundation

प्राणस्यशिरआदिकंशरीरस्थप्राणादौतिष्ठतीतिप्रसंगे आत्माख्यमध्यदेहपुच्छयोःकथमाकाशपृथिवीस्थितत्वोक्तिरित्यतो नात्र पृथिव्याकाशावुच्येते येनप्रसंगाननुगुणत्वमित्याह ॥ उदानइति ॥ प्रद्युम्नस्यशिरआदिकंप्राणादिस्थंप्राणादिनामकं कैर्निमित्तैरित्यतोनिरुच्याह ॥ प्रणेतृत्वात्प्राणनामेत्यादिना ॥ ६ ॥ प्रद्युम्नाख्योभगवान्शरीरस्थतयासर्वप्रवर्तकइत्युक्तार्थेश्लोकंपठन्नाह ॥ तदपितत्रार्थेपीति ॥ तत्रश्लोकेसर्वमेवतआयुर्यतीतिसर्वायुःप्रदत्वमुक्तं तद्घटयितुमुक्तं प्राणोहिभूतानामायुरिति तद्व्याचष्टे ॥ सएवजगतामायुरिति ॥ सामान्यज्ञानंविशेषज्ञानंचज्ञानपदार्थः ॥ ७ ॥ तंमनोमयविज्ञानमयप्रकरणाभ्यामाह ॥ तस्मादिति ॥ तत्रमनोमयप्रकरणंव्याचष्टे ॥ तस्मिन्संकर्षणइत्यादिना ॥ सुविस्तृतेरुपदेशरूपत्वात्पंचरात्रमादेशाख्यमित्युच्यते । अथर्वाख्यं अथर्वांगिरसाख्यं । अधरत्वादंगिरसत्वाच्चपुच्छं तथोक्तमित्यर्थः । साकल्येनयजुराद्यप्रतिपाद्यत्वं तात्पर्यार्थः ॥ ८ ॥ तंमहिमानंश्लोकेनवक्ष्यन्नाह ॥ तदपीति ॥ मनोमयस्यवागाद्यगोचरत्ववेत्तुःफलमाहसमग्रश्लोकेन । यो जनातु मनोमयस्यब्रह्मणआनंदंविद्वान्कदाचननबिभेति ॥ ९ ॥ आनंदःकिंप्रकारोज्ञातव्यः यज्ज्ञानंभयराहित्यकारणमित्यतोवागाद्यगोचरत्वेनेति तंश्लोकं आनंदंब्रह्मणइत्युक्त्याभेदप्रतीतिंनिवारयन्व्याचष्टे ॥ मनोवाचामिति ॥ श्रद्धादिस्थशिरआदिमद्विज्ञानाधीनंयज्ञादीत्यभिप्रायार्थः ॥ १० ॥ तंश्लोकेनवक्ष्यन्नाह ॥ तदप्येषइति ॥ विज्ञानंयज्ञादिप्रवर्तकत्वेनज्ञेयं । तथाज्ञातुःफलमाह ॥ विज्ञानंब्रह्म यज्ञादिप्रवर्तकत्वेनवेदचेदिति ॥ विज्ञानमयप्रकरणंव्याचष्टे ॥ वासुदेवइत्यादिना ॥ श्रुतिंधत्तइतिश्रद्धा । ज्ञानंददातीतिऋतं । मध्यंयोगाख्यं । सर्वस्यलोकस्यात्रयोगात् । देशतःकालतोगुणतश्चानंतत्वम

SGDF
Sri Gargeshwari Digital Foundation

नंतपदार्थः ॥ ११ ॥ तत्कुतइत्यतःपूर्णानंदत्वा द्व्यतिरेकेणयथाहमित्याहानंदमयप्रकरणेन । तद्व्याचष्टे ॥ तस्मिन्नानंदरूपइ त्यादिना ॥ परेयं परैःप्राप्यत्वात्प्रियनामकमित्यर्थः । मध्यमानंदनामकं आनंदस्थंच । कुतोमध्यमानंदनामकमित्यतआह ॥ आतत्वादानंदइतियोज्यं ॥ ब्रह्मपुच्छमित्यत्रब्रह्मशब्देनकिमुक्तमितिनज्ञायते अतोव्याकरोति ॥ ब्रह्मेति ॥ योजनातु पुच्छंसृष्ट्याबृंहयेदतोब्रह्मनाम । देहस्थितब्रह्माख्यप्रधानवायौपुच्छंसंस्थितं । पूर्वस्ययःशारीरआत्मा । तस्यैषएवशारीरआत्मे तिशरीरशरीर्युक्त्याभेदःप्रतीयते तांनिवारयन्नाह ॥ अभेदो भेदरहितोपीति ॥ इंद्रार्जुनादिवदविशेषोविशेषरहितोपि को देहवत्कोदेहिवदित्यतआह ॥ बहिस्थःइति ॥ वयंयथाशरीरंविहायकेवलंबाह्यादानेअशक्तत्वात्देहिनोजाता स्तथाकिमयमपि देहीत्यतोनेत्याह ॥ अंतरिति ॥ अंतर्व्याप्तिविशेषेणदेही नतुदेहंविहायबाह्यादानेअशक्तत्वादेहीत्यर्थः । सवाएषपुरुषविधए व । तस्यपुरुषविधतां । अन्वयंपुरुषविधः । तेनैषपूर्णइतिपंचस्वपिप्रकरणेषुस्थितवाक्यंक्रमेणव्याचष्टे ॥ सर्वेपीत्यादिना ॥ उ त्तरादुत्तरस्यपुरुषविधत्वात् पूर्वस्यपुरुषविधत्वसंभवः । स्पष्टमन्नमयादिशब्दार्थानाह ॥ अत्तृत्वमिति ॥ नन्वत्तृत्वादिगुणाः पंचानामपिसंति । अतोन्नमयादिनामान्यपि । तथापिकिंनिमित्ततोनामभेदइत्यतआह ॥ अत्त्यादिदाइति ॥ यद्यपिअन्नम यादीनिपंचापिब्रह्माणि जीवाद्भिन्नानिचेतिवस्तुगतिः ।अन्नात्खल्विमानिभूतानिजायंतइत्यादिनाब्रह्मलक्षणवत्त्वादित्युक्तत्वात् । तथापितानि ये नब्रह्मेतिविदुर्येचब्रह्मेतिविदुस्तेषांफलमाह ॥ असन्नेवेति ॥ जीवादन्यत्ब्रह्म असन्नास्तीतिवेदचेदसन्नेव दुः ख्येवभवति । विपर्ययेणोत्तरार्धंयोज्यं । तंश्लोकंव्याचष्टे ॥ पंचरूपमिति ॥ असत्त्वंसत्त्वंचविशदतयोक्तं तमआलया मोक्ष

योग्याइति ॥ १२ ॥ अस्तिब्रह्मेतिचेद्वेदेत्यत्रजीवादन्यतयाब्रह्मवेत्ता सन् सुखी मुक्तोभवतीत्युक्तं। तत्रवरुणेनकृतान्प्रश्नानाह ॥ अथातइति ॥ अतः प्रश्नबीजभावात् । अनुसारिणःप्रश्ना अनुप्रश्नाः। तत्व्याचष्टे ॥ इत्युक्तइति ॥ इत्युक्ते ब्रह्मवित्मुक्तो भवतीत्युक्ते। इति अतःशब्दार्थः । आहोस्विद्विद्वानेवामुंलोकंप्रेत्यगच्छति उताविद्वानपिकश्चनप्रेत्यामुंलोकंगच्छतीत्येकःप्रश्नः । उतज्ञानिनःसर्वेपिसमश्नुवते अथवाकश्चित्समश्नुतइतिप्रश्नद्वयंप्रतीयते । अथातोनुप्रश्नाइतिप्रश्नास्तुबहवः । अतोविरोधः । तं विरोधंविवक्षिताध्याहारेणपरिहरन्व्याचष्टे ॥ अविद्वानित्यादिना ॥ तत्र उइतिसमाधानं । तदभिप्रायंव्यंजयन्व्याचष्टे ॥ इतिपृष्टःसन्नित्यादिना ॥ ज्ञान्येवब्रह्माप्नोतीत्येतमेवार्थंसतपोतप्यतेत्यादिनापश्चाद्विस्तरेणजगादह । ज्ञानिनएवमुच्यंते ते चसर्वेपिमुच्यंते तेषुसर्वेषुकश्चिदेव सम्यक्समश्नुत इत्ययंविशेषउकारेणकथंलभ्यतइत्यतस्तत्प्रकारंदर्शयति ॥ कश्चिदिति ॥ कश्चिदेवतत्सम्यगाप्नुयादितिप्रश्नस्य ज्ञानिनएवमुच्यंतइत्यत्रांतर्भावात्तद्वाक्यानंतरमभ्युपगमवाच्युकारस्यब्रह्मोक्तत्वादुकारेणा यंविशेषोलभ्यतइत्यर्थः।संगतिंसूचयन् ज्ञान्येवमुच्यतइत्ययमर्थः सतपोतप्यतेत्यादिनाकथंलब्धइत्यतस्तंप्रकारंदर्शयति॥ अज्ञइ ति॥रसंह्येवायंलब्ध्वानंदीभवतीत्यत्राज्ञस्तन्नैवाप्नोति किंतुज्ञान्येवेतिज्ञापयितुंविष्णोःस्वातंत्र्यज्ञापनायसृष्ट्यादिकमाहेत्यन्वयः। ननुज्ञानादेवतत्प्राप्तिस्तथाचसृष्टयुक्त्यातन्माहात्म्यकथनस्यकुत्रोपयोगइत्यतो नज्ञानात्तत्प्राप्ति रपितुज्ञानजभगवत्प्रसादात् । सतुभगवन्माहात्म्यज्ञानेनभवति । अतःसृष्टिकथनोपयोगइत्याह ॥ माहात्म्येति ॥ विदुषोमन्वानस्याविदुषोपितत्त्वेवब्रह्मैव भयंभयंकरमित्युक्त्वा तत्रैवमंत्रउक्तः भीषेति । तस्यप्रकृतोपयोगंदर्शयति ॥ तद्भशाइत्यादिना ॥ ब्रह्मज्ञानंनाम

किंरूपमित्यतोजगत्स्रष्टृत्वादिज्ञानमिति सृष्टिरुक्तेतिसंगत्यंतरंकरोति ॥ सविज्ञेयइति ॥ स्रष्टृत्वादिमहैश्वर्यं ॥ १३ ॥ सत्व कामयत् । सोकामयतेत्यादिवाक्येनोच्यते । सोकामयतेत्यादिव्याचष्टे ॥ सृष्ट्वेति ॥ बहुरूपभवनार्थंजगत्स्यादित्यचिंतयत् । सृष्ट्यर्थंतपश्चकारेतिप्रतीतिंवारयन्व्याचष्टे ॥ स्यादिति ॥ ननुकपिलादिरूपैःतपसःकृतत्वात्कथंविष्णोस्तपोनामालोचनमेव नसं तापरूपमित्युक्तिरित्यतआह ॥ अवतारेष्विति ॥ ईश्वरस्यजगदाकारेणपरिणामःसृष्टिरितिकेचित् अतोवास्तवमाह ॥ सृष्टि रिति ॥ सइदंसर्वमसृजतेतिमूलरूपमेवजगत्ससर्जेतिप्रतीतिंश्लोकेनवारयन्नाह । तदपीति । तत्रैवमाशंका । अवताररूपमेवजग त्सृष्टौशक्तं । नमूलरूपमिति । तांवारयन्नाह ॥ यद्यपीति ॥ यद्यपिस्वोदरस्थंजगत्स्रष्टुंमहात्मनोमूलरूपस्यशक्तिरस्ति । तथाप्ये षइत्यन्वयः । तत्सृष्ट्वातदेवानुप्राविशदितिव्याचष्टे ॥ रूपांतरेणेति ॥ तदनुप्रविश्यसच्चत्यच्चाभवदित्यादिवाक्येत्यदनिरुक्त निलयनविज्ञानसत्यपदवाच्यंजगदभवत् । सन्निरुक्तानिलयनाविज्ञानानृतशब्दवाच्यंजगदभवद्ब्रह्मेत्युक्तं । तत्राद्यैस्त्यदादिभिःपंच भिःशब्दैःकिंजगदुक्तं सदादिभिश्चपंचभिःकिंजगदित्यपेक्षायामाह ॥ त्यच्चेत्यादिना ॥ प्रकृतिप्राणयोर्महतश्च परं शिष्टं जगत् । द्विविधंजगत्तेषांशब्दानांमुख्यवाच्यं किमित्यतोनेत्याह ॥ तद्गेति ॥ संबंधात् अस्वतंत्राल्पप्रवृत्तिनिमित्ततो जगत्सदादिशब्दवा च्यमित्यर्थः । स्वतः स्वतंत्रमुख्यप्रवृत्तिनिमित्तभावात् । त्यदादिशब्दप्रवृत्तिर्भगवतिकेननिमित्तेनेत्यतआह ॥ ततइत्यादिना ॥ अवाच्यत्वेआनंत्यादितिहेतुः । प्रकृतिप्राणयोर्महतश्चान्यत्रशिष्टेजगतिअवसादनादिकुर्वन्यतोतस्तन्नामकोहरिरितियोजना । सत्यमभवदितिद्वितीयसत्यपदार्थमाह ॥ साधुस्वरूपइति ॥ सदादिशब्दानांजगतिकथंव्युत्पत्तिरित्यतस्तामुपलक्षणत्वे

SGDF Sri Gargeshwari Digital Foundation

नदर्शयति ॥ अनेनेति ॥ अनेनचेष्टकेनऋतंप्राप्तंअनृतं अविज्ञानंसर्वज्ञानरहितं अनिलयनंअनाश्रयं नितरांउक्तंनिरुक्तं सीदतीतिसत् साधुत्वात्सत्यं विज्ञानंसर्वज्ञत्वात् निलयनमाश्रयत्वात् नितरामनुक्तत्वादनिरुक्तं ततत्वान्नियामकत्वाच्चत्यदित्यर्थः। सत्यदादिशब्दवाच्यंब्रह्मेत्ययुक्तं । तत्रकेषांचिच्छब्दानांअमंगालर्थत्वादित्यतःप्राप्तंयदिदंकिंचेत्यादि । तद्व्याचष्टे ॥ यदिदमिति ॥ तत्सर्वंसाधुतैवहीत्युक्तंविविच्यदर्शयति ॥ अवसादनादीति ॥ सर्वशःसर्वं । योजनातु अवसादनादिहेतुत्वंतावत्साधुतैवहि अवसादनादिस्त्वसाधुता । तथाचसदादिशब्दभाषितंतत्कर्तृत्वंसाधुतैवहीति ॥ १४ ॥ मूलरूपेणजगत्ससर्जेतिप्रतीतिनिरासायोक्तं वहुस्यामिति । तत्रश्लोकंपठति ॥ तदपीति ॥ तद्व्याचष्टे ॥ अनासाद्यइत्यादिना ॥ आसाद्यः प्राप्तुंशक्यःमुमुक्षुणा । आसाद्यत्वमेवविशदयन्नाह ॥ यद्वैतदिति ॥ तद्व्याचष्टे॥ रसइति ॥ ततइतिश्रवणाद्यतइतिग्राह्यं । योजनातु रसइत्यानंदोयतः ततःतद्रूपोभगवानानंदइति । सभगवानानंदरूपःकुतःसिद्धइत्यतः कोह्येवान्यादित्यादिनायुक्त्यासमर्थयते । तद्व्याचष्टे ॥ आदीसइति ॥ आदीसत्वादाकाशएषभगवान्यद्यानंदोनभवेत्तर्हिजगन्नचेष्टयेत् । यदिनचेष्टयेत्तर्हिसामान्यचेष्टाधर्माश्चतमृतेकस्यस्युः । नकस्यापीत्यर्थः । यद्याकाशआनंदोनस्यात्तर्हिजगत्कोन्यात्कःप्राण्यान्नैवकोपीतितर्कस्य विपर्ययपर्यवसानमाह ॥ सुखमिति ॥ मत्तवत्कारणांतराभावेपिकर्तृत्वात्सुखंलब्ध्वाकुरुतइतिसिद्धमित्यर्थः । ननुजगच्चेष्टकत्वेन सुखंस्यात् नतुपूर्णसुखं इतितत्राह ॥ अल्पादिति ॥ कारणस्यसुखस्याल्पत्वेकार्यकर्माल्पं । आनंदस्यमहत्त्वेहितत्कार्यकर्मापिमहदित्यर्थः । विमतःसुखी कारणांतराभावेपिकर्तृत्वादित्येतद्व्यतिरेकप्रमाणेनसमर्थयते ॥ नहीं

SGDF
Sri Gangadhara Digest Foundation

ति ॥ यःसुखीनभवति असौकारणांतराभावेपिकर्तानभवतीतिव्यतिरेकव्याप्तौ आर्तानांमुग्धानांचदृष्टांतत्वं । तेषामत्यंतदुःखित्वादत्यंतदुःखस्यचाप्रवर्तकत्वात् । प्रवर्तकस्येषत्सुखसंभिन्नदुःखस्यचाभावादितिद्रष्टव्यं । अल्पात्सुखादल्पंकर्म पूर्णानंदात्सर्वकृदित्युक्तंविवृणोति ॥ तस्मादिति ॥ तस्मादित्युक्तंहेतुमेवविवृणोति ॥ यादृगिति ॥ तस्यार्थः सुखस्यकारणस्याल्पत्वेनकार्यस्यकर्मणोप्यल्पत्वं तन्महत्त्वेतन्महत्त्वमितियतोनियम स्ततःसर्वकर्तृत्वात्परोविष्णुःपूर्णसुखइति । सुखप्राप्तिदुःखनिवृत्त्यादिकारणांतराभावेपिप्रवृत्तिमत्त्वस्यसुखित्वेनाविनाभावःश्रौतश्चेत्याह ॥ तस्मादिति ॥ कारणांतराभावेप्रवृत्तिमत्त्वस्यसुखित्वेनव्याप्तिभावादयंपरमात्मासुखंलब्ध्वाकरोतीतिछंदोगानांश्रुतिराहेत्यर्थः । कारणांतराभावेपिप्रवृत्तेःसुखकार्यत्वोक्त्यासुखाभावेसानभवेदितिसिद्धमप्यर्थंस्फुटयति॥ अलब्ध्वेति॥ इतिपाठांतरं ।नासुखंलब्ध्वाकरोति। सुखार्थंदुःखनिवृत्त्यर्थंवानकरोतीत्यवधारयंती। तदर्थमाह ॥ अलब्ध्वेति॥ अनुमानार्थमुपसंहरति ॥ तत्पूर्णेति॥ अस्ययोजना यस्मात्सर्वलोकोदेवेनकारितःप्राणिति तत्तस्मात्सदेवःस्फुटंपूर्णानंदइति। परमसुखकारणत्वाच्चेश्वरआनंदरूपइतियुक्त्यंतरमाह ॥एषह्येवानंदयतीति॥तद्व्याचष्टे॥सएवेति ॥१५॥ज्ञान्येवमुच्यतेइत्यस्योपसंहारव्याजेनतज्ज्ञानंप्रतिष्ठितमेवमोक्षसाधनंनान्यथेत्याह ॥ यदाह्येवैषइत्यादिना ॥ तद्व्याचष्टे ॥ तस्मादिति॥ ज्ञानंप्रतिष्ठितमेवमोक्षसाधनंयस्मात्तस्मा न्नकेवलंसम्यग्ज्ञानाभावेमोक्षाभावः । विपर्ययज्ञानेनानर्थश्चस्यादित्याह॥यदाह्येवैषइति॥ तद्व्याचष्टे॥ यदेत्यादिना॥ यदायदि एषएतस्मिन्परेविष्णौ कृष्णरामादिरूपापेक्षया जीवगतत्वात्कारणादुदरमंतरंभेदंकरोति । कृष्णरामादेर्विष्णुप्रतियोगिकभेदंपश्यतीतियावत् । अथ तेनभेददर्शनेनास्यमहद्भयंभवती

त्यर्थः । उदरंजीवगमित्युक्तं तत्कथं शब्दादवगतमित्यतस्तद्दर्शयति ॥ अइति॥ ब्रह्मज्ञानमेवमोक्षसाधनं नान्यदितिभावेनतस्यसामर्थ्यमाह॥ तत्त्वेवेति॥ तद्व्याचष्टे ॥ तदेवेति ॥ विदुषोपिभयभावेविज्ञानस्यकोविशेषइत्यतआह॥ विदुषइति॥अज्ञस्यभयकृद्भगवानित्यनुभवसिद्धं । ज्ञानिनामपिभयकृदितिकुतःसिद्धमित्यतःश्लोकंपठन्नाह॥ तदपीति॥ भीडित्यस्यतृतीयाभीषेति। भियेत्यर्थः । तद्व्याचष्टे ॥ तस्मादिति ॥ अमन्वानस्यभयकृद्ब्रह्मेत्युक्तं । अमन्वानोद्विविधः । सम्यग्ज्ञानरहितोविपरीतश्च । तत्राद्यस्यसंसारोभयं । विपरीतस्यतुभयंकिमित्यतआह ॥ अमन्वानस्येति ॥ विपरीतस्येतियावत् । ज्ञानिनांसर्वेषामपिमोक्षइत्युकारेणोक्तस्यपश्चादविवृतत्वात्तद्विवृणोति। विदुषामिति॥१६॥ ज्ञानिनःसर्वेनसम्यक्समश्नुवते । कश्चिदेवेत्युकारेणोक्तंप्रमेयं मुक्तचक्रवर्त्यादिभ्योमुक्तमनुष्यगंधर्वादीनांशतगुणाधिकत्वपूर्वमाह ॥ सैषानंदस्यमीमांसेत्यादिना ॥ तद्व्याचष्टे॥ तत्रापीति ॥ अनेन सैषानंदस्येत्युक्तार्थंभवति । युवास्यादित्यादिव्याचष्टे ॥ यस्त्वित्यादिना ॥ अस्ययोजना यस्तुसंसारेसाधुभिर्गुणैःयुक्तो युवा त्रेतायुगेचक्रवर्तीतस्यैवेयमखिलामहीवित्तेनपूर्णास्यात् । सएवयदासाधुगुणयुक्तत्वात्संसृतेर्मुक्तोतोधीतिफलयुक्तत्वादाध्यायकःईरितः । सएवविष्णुनायुक्तोगच्छतीतियुवास्मृतः । आशिष्ठोत्यंतसुखी । दृढिष्टोनिर्विकारः । बलिष्ठोतिबली । सएकोमानुषआनंदः । असौमानुषोमुक्तः मनुष्यचक्रवर्तीमुक्तः एकानंदस्वरूपइष्यते । सर्वत्र श्रोत्रियस्यचाकामहतस्येत्येतत् निरंतरपूर्वोक्तमुक्तादन्यपरत्वप्रतीतिंनिवारयन्व्याचष्टे ॥ मुक्ताइति ॥ अमुक्तादमुक्तस्य मुक्तान्मुक्तस्य तारतम्यमाहेतिबृहदारण्यकभाष्यं ॥ १७ ॥ येसाक्षात्देवप्रेष्यास्तेदेवगंधर्वाः ॥ १८ ॥ देवेष्वनाख्याताःअकथिताः

SGDF Sri Gargeshwari Digital Foundation

॥ २० ॥ केतेकर्मदेवाः । कुतश्चकर्मदेवाइत्यतःप्राप्तं येकर्मणादेवानपियंति देवत्वंप्राप्नुवंतीति । तद्व्याचष्टे ॥ बल्याद्याइति ॥ अंतरा कर्मणेतिशेषः ॥ २१ ॥ इंद्रबृहस्पतिशब्दयोःप्रसिद्धेंद्रबृहस्पतिपरत्वप्रतीतिंवारयन्व्याचष्टे ॥ तेभ्यइति ॥ किंनिमित्त तोदक्षइंद्रनामेत्यतउक्तं ॥ सहीति ॥ रारयत् क्षयमनयत् । रीङ्क्षयइतिधातोः ॥ २३ ॥ पुरंदरः बृहंश्चासौपतिश्चेतिबृहस्प तिः । एतदाह ॥ महेंद्रत्वादिति ॥ २४ ॥ पूर्वपूर्वस्मादुत्तरोत्तरस्यानंदादेःशतगुणाधिकत्वमुपलक्षणत्वेनोक्तमित्याशयवाना ह ॥ यथेति ॥ नन्वेकस्मादेकस्यकथंआनंदादौशतगुणाधिकत्वं सहस्रगुणाधिकत्वंचेत्यतआह ॥ परिमाणइति ॥ आनं दादिस्फुटतावशात्सहस्रगुणितत्वादिकमुपपन्नमित्यर्थः । ननुस्फुटतायाःपरिमाणविशेषाधीनत्वात्तदल्पत्वेस्फुटतापिकथंमहती स्यादित्यतआह ॥ यथादीपादीति ॥ बहुलोपि सूर्यात्द्विगुणमुदीपितोपि । एवंस्फुटतायाःपरिमाणाधीनत्वाभावात्परिमा णाल्पत्वेपितदुत्तरेषांगुणाअतिस्फुटाः । उत्तरोत्तरेषांगुणानामतिस्फुटत्वे अवरगुणानांतदभावेचकिंनिमित्तमित्यतआह ॥ प्र तिर्बिंबाइति ॥ २६ ॥ आत्मनिस्थितंरसंह्येवायंलब्ध्वानंदीभवतीत्युक्तं तत्रयथालोकेकरचरणाद्यंगसाकल्येनभिन्नदे(श)ह स्थितानांभेदोदृष्ट स्तथांगसाकल्येनभिन्नजीवस्थितोभगवानपिभिन्नःकिं इत्याशंकायांनेत्याह ॥ सयश्चायमिति ॥ तत्रसइ तिपरामृश्यमानःकइतिनज्ञायते ऽतस्तंज्ञापयंस्तद्वाक्यंव्याचष्टे ॥ यदिति ॥ सर्वजीवेष्वित्युक्तंविवृणोति ॥ नृषुदेवेष्विति ॥ तेनपुरुषेआदित्येइत्येतत्नीचोच्चोपलक्षणमितिसूचितं । अंगसाकल्येनभिन्नस्थलनिवासिनोप्येकत्वेघटकमाह ॥ महायोगी ॥ तद्घटकशक्तिमानिति । ऐक्येपींद्रार्जुनादिवद्विशेषोपिनेत्याह ॥ निर्विशेषइति ॥ विशेषाभावेसर्वोत्तमत्वादिकारणमाह ॥ स

SGDF
Sri Gangadhara Dayaal Foundation

वोत्तमइति ॥ सर्वरूपेष्वभेदादिवेत्तुस्तारतम्यवेत्तुश्चफलमाह ॥ सयएवंविदस्माल्लोकादित्यादिना ॥ तद्व्याचष्टे ॥ तमेवं वेदेति ॥ २७ ॥ तारतम्यांतर्गतत्वेनविष्णुज्ञानिनोपिकथंतत्प्राप्तिलक्षणोमोक्षःस्यात् पूर्वार्जितकर्मभावादित्यतआह॥ एतंहवा वनतपतीति ॥ अस्यार्थः । कमैतंमुक्तंपश्चात्तापेननतपतीति । पश्चात्तापप्रकारमाह ॥ किमहमिति ॥ पश्चात्तापःकस्मान्नभव तीत्यतआह ॥ सयएवंविद्वानिति ॥ यआत्मानंपरमात्मानं एवमुक्तप्रकारेण विद्वान् सउभेस्तृणुते । अतस्तस्यकर्मफलंनभ वतीत्यर्थः। इतिवक्ष्यति । अत्रार्थेश्लोकःप्रथमतएवपठितः । तद्वाक्यजातंलेशतोव्याचष्टे ॥ नपुण्येति॥ उक्तप्रकारेणभगवज्ज्ञा नीआत्मनःउभेअनिष्टेजहातीतिनोपचरितमितिभावेनतथावेत्तुरपितदेवफलमाह ॥ उभेह्येवैषएतेआत्मान२स्पृणुतेयएवंवे देति ॥ अस्ययोजना यएवमात्मानंवेद सउभेस्पृणुतइतियोवेद एषोप्यात्मनउभेस्पृणुतइति ॥ २८ ॥ ब्रह्मविद्ब्रह्मणासहापेक्षि तसर्वकामानश्नुतइतिस्वव्याख्यानदृढीकरणाय ब्रह्मवित्सह एककालंयुगप त्सर्वान्कामानश्नुते तत्कथंमुक्तस्यसर्वकामभोक्तृत्वं तेमतेइत्यतो ब्रह्मणा ब्रह्मरूपेणेतिपरिहारः । मुक्तस्यब्रह्मीभूतत्वात् ब्रह्मणश्चभोक्तृसर्वजीवात्मकत्वाद्घटतइतिपरव्याख्यानंदूष यितुंप्रतिजानीते ॥ नचेति ॥ तत्रहेतुमाह ॥ अप्रामाणिकत्वादिति ॥ मुक्तस्यब्रह्मात्मकत्वस्याप्रामाणिकत्वात् ब्रह्मणेतितृ तीययासहशब्दस्यसाक्षात्संबंधप्रतीतेः बलादन्यथार्थकल्पनेनाश्वासाच्चनसाव्याख्येत्यर्थः । नन्वन्नात्पुरुषइतिअन्नशब्देनप्रसिद्ध मन्नंस्वीकृतं । अन्नरसमयइत्यत्रान्नशब्दस्याद्यत्वमत्तृत्वमर्थौस्वीकृतौ । तथाचैकप्रकरणेश्रुतैकशब्दस्यार्थद्वयकल्पनमन्याय्यमि तिनतद्व्याख्यापीत्याशंक्यनिषेधति ॥ नचेति ॥ कुतोनविरोधइत्यतआह ॥ अन्नस्येति ॥ अन्नस्यान्नमित्यत्रयथाषष्ठ्याअन्न

SGDF
Sri Gangadhar Digital Foundation

मन्यत्स्वीकृतं यथायोयंमध्यमःप्राणः प्राणःस्थूणेति मध्यमः स्थूणेति विशेषणादेकप्रकरणेश्रुतस्यापिप्राणशब्दस्यार्थद्वयकल्पन मेवंरसशब्देनविशेषितत्वादर्थद्वयोपपत्तेरित्यर्थः । अन्नमयादयःपंचापिब्रह्मेतिस्वमतं अन्यस्य ते नब्रह्मेति । तदूषयति ॥ नचेति ॥ अन्नमयादीनांब्रह्मत्वेकिंमानमित्यतोव्याख्यानरूपंप्रमाणमेकं । प्रमाणांतरंचाह ॥ येन्नंब्रह्मेत्यादिना ॥ नचान्नप्राण चक्षुःश्रोत्रादीनांब्रह्मशब्दाश्रवणात् अब्रह्मत्वमिति । अधीहिभगवोब्रह्मेतिप्रार्थनेउक्तानामन्नादीनांब्रह्मत्वसिद्धेः । अन्यथाऽ नाश्वासादित्यर्थः । अन्नमयस्याब्रह्मत्वेबाधकांतरंचाह ॥ नचेति ॥ नचप्रसिद्धस्यान्नस्यात्तृत्वं । किंतुतथादर्शनमेवातोनतद्बा धकमित्यतआह ॥ येन्यथेति ॥ अन्यथाविदुर्वस्तुवैपरीत्येनविद्युःयेन्यथाविद्युस्तेषांभवतूक्तोदोषः । नत्वन्यथाध्यायिनामित्य तोबाधकमाह ॥ अविद्यमानेति ॥ वस्तुवैपरीत्येनासदुपासकानांदोषप्रतिपादकंकिंतदित्यतःतत्पठति ॥ नचेति ॥ असदुपा सकानामनर्थोभवतीत्यत्रस्पष्टंप्रमाणांतरंचाह ॥ नाविद्यमानमिति ॥ कथंतर्हिवेदादौ योषितमग्निंध्यायीतेति असदुपास्तिरु क्तेत्यतआह ॥ तस्मादिति ॥ तस्मादसद्ध्यायिनामनर्थोक्तेरितियावत् । योषितमग्निंध्यायीतेत्यादीनांसर्वशोपिवेदवाक्यानांय थाग्निःस्पृष्टोनर्थहेतुः तथायोषिदपिस्पृष्टेतिसत्यार्थतांब्रूयादित्यर्थः । नन्वानंदमयोजीवएव । नचतथात्वेब्रह्मशब्दविरोधः । तस्यब्रह्मात्मकत्वेनतदुपपत्तेरित्यतआह ॥ सयश्चेति ॥ ननुपुरुषादित्यौउपाधिविशिष्टंचैतन्यं । तथाचतत्रशुद्धस्यापिभावात्त द्विवक्षयाधिकरणत्वेनभेदोक्तिःसांसारिकीभविष्यतीत्यतोविधूतोपाध्यवस्थायामपिभेदश्रवणान्नैवतदित्याह ॥ एतस्मिन्निति ॥ उदाहृतवाक्येषुप्रतीतोभेदोमुक्तभेदइतिकुतइत्यतआह ॥ अथेति ॥ सैषानंदस्येत्येतन्मुक्तानंदपरतयाव्याख्यातं । तत्कुतइत्य

तः साधयितुंप्रतिजानीते ॥ सैषेति ॥ प्रमाणेनतथाव्याख्यातत्वादितिभावः । युक्त्यंतरंचाह ॥ श्रोत्रियस्येति ॥ श्रोत्रिय त्वाकामहतत्वविशेषणाभ्यांकथंमुक्तत्वसिद्धिरित्यतआह ॥ नहीति ॥ कथंमुक्तस्यकामहतत्वादिकंनसंभवतीत्यतःश्रोत्रियपदा र्थमाह ॥ यस्येति ॥ संपूर्णश्रुतिफलंप्राप्तःश्रोत्रियोस्तु । तथापिकिंप्रकृतइत्यतआह ॥ सहीति ॥ सएवमुक्तः अकामहतश्च । मुक्तस्याकामहतत्वंकुतइत्यतआह ॥ सहिकामैरिति ॥ मुक्तःकामैःकुतोनहन्यतइत्यतआह ॥ यस्येति ॥ मुक्तस्यसत्यकाम त्वात्कामाहतत्वमुक्तं तदयुक्तं । मुक्तस्यकामस्यैवाभावादित्यतः चेतनत्वादीश्वरवत्सकामइतिभावेन चेतनत्वहेतोःकामवत्त्वे नव्याप्तिंसमर्थयते ॥ नहीति ॥ केषांचि त्पदस्थिताच्चक्रवर्तिनोमनुष्यगंधर्वस्यशतगुणआनंदः चक्रवर्तिपदाकामिनोमनुष्यगं धर्वपदेकामरहितस्योत्तरपदकामवतःश्रोत्रियस्यशतगुणआनंदइत्यादिकाव्याख्या तांदूषयति ॥ नचेति ॥ ननुदेवपदेंद्रपदका मरहितयोरभावात्कथंदेवपदाकामस्यसकाशादिंद्रपदाकामस्यशतगुणानंदोनदृश्यतइत्युक्तिरित्यतआह ॥ नचेति ॥ मुक्तत्व द्योतकश्रोत्रियत्वाकामहतत्वयोरभावात्कथंमुक्तक्षत्रियपरतयायुवास्यादितिव्याख्यातमित्यतआह ॥ चक्रवर्तिनस्त्विति ॥ ननुयदासर्वेप्रमुच्यंतेकामाइत्यत्रमुक्तानांकामाभावोक्तेर्मुक्तस्यकामसाधनानुमानंबाधितमित्यतआह ॥ यदेति ॥ हृदिस्थिताइ तिविशेषणादितिभावः । भवेदेवं यदिमुक्तस्यकामःप्रमितःस्यादित्यतआह ॥ यंयमिति ॥ अंतमवसानंनिर्णयंवा । भुक्तानां स्वरूपभूतकामप्रतिपादकंस्पष्टंचवचनमाह ॥ कामइति ॥ स्वरूपभूताःसंतीतिशेषः । संकल्पोनामक्रियाहेतुःकामः नचसांसा रिककामवद्दोषापादकत्वंतेषांमंतव्यमित्याह ॥ तेसर्वइति ॥ मुक्तानांस्वरूपभूतकामभावेसूत्रंपठति ॥ संकल्पादेवेति ॥

SGDF Sri Gargeshwari Digital Foundation

आनंदमयस्यजीवत्वेपिनब्रह्मशब्दविरोधः । तस्यतदात्मकत्वादित्यत्रसूत्रविरोधंदर्शयति ॥ भेदेति ॥ नन्वस्मादयंभिन्नः अन
योर्भेदइतिवाभेदप्रतीतिः । साचान्योन्याश्रयादिदोषदुष्टा । तथाचसूत्रकृताश्रुत्याचाऽऽविद्यकभेदोनूद्यतइत्याशंकांनिषेधति ॥
नचेति ॥ ननुधर्मिप्रतियोगिप्रतीतौभेदप्रतीतिः भेदप्रतीतौतत्प्रतीतिः । विशेषणप्रतीतौभेदप्रतीतिः । विशेष्यभेदप्रतीतौ
विशेषणधर्मिप्रतीतिरित्यन्योन्याश्रयदुष्टस्यकथंनासुकरत्वमशक्यग्रह(त्वमि)त्वादित्यतआह ॥ स्वरूपत्वादिति ॥ भेदस्यभाव
स्वरूपत्वाद्ग्रहणे नान्योन्याश्रयादिदोषइत्यर्थः । भेदस्यपदार्थस्वरूपत्वंकुतइत्यतस्तत्रवस्तुप्रतीतावेवप्रतीयमानत्वादितिसर्वावि
गानमनुमानंप्रमाणयति ॥ सर्वेति ॥ सर्वस्यस्वरूपं सर्वव्यावृत्तंसर्वासंकीर्णंसर्वैरनुभूयतइति । अनुभूतिकलहइत्यतआह ॥
अन्यथेति ॥ दृष्टःपुरुषःअहमेवेतिविपर्ययोपिस्यादित्यपिशब्दार्थः । भेदस्यभावास्वभावत्वेपिनदृष्टपदार्थविषयःसंशयः । भाव
दर्शनानंतरमेवभेदप्रतीतेरित्यतआह ॥ नचेति ॥ पदार्थस्वरूपमेवप्रथमंज्ञायते पश्चाद्भेदोज्ञायतइत्यत्र सर्वासंकीर्णंवस्तु नानु
भूयतेचेत् दृष्टोहंवाअन्योवेतिसंशयःस्यादित्युक्तं । नेदमनिष्टमित्यतआह ॥ नहीति ॥ दृष्टस्यवस्तुनःवस्त्वंतरात् । नचवस्तु
सर्वव्यावृत्तमनुभूयतइतियुक्तं । तस्यसर्वज्ञत्वापेक्षित्वात् । सर्वेषांतदभावादित्याशंक्यनिषेधति ॥ नचेति ॥ कुतःसर्वज्ञत्वप्रसं
गोनास्तीत्यतःसामान्यतःसर्वज्ञतातावदस्त्येवेत्याह ॥ सामान्यतइति ॥ विशेषतःसर्वज्ञताचेत्साऽनपेक्षितैव । विशेषतोभेद
स्याज्ञायमानत्वादितिचोद्यंपरिहारश्चद्रष्टव्यः । भेदस्यविशेषाकारेणाज्ञानेतदात्मकत्वात्स्वरूपमपिविशेषाकारेणनज्ञायेतेत्यतोभे
दोयतोविशेषेणनज्ञातः स्वरूपमपिविशेषेणनज्ञायते । यतोविशेषतोज्ञायतेभेदः ततःस्वरूपमपीत्याह ॥ यावदिति ॥ सामा

SGDF Sri Gargeshwari Digital Foundation

न्यतःसर्वमपिसर्वैर्ज्ञातमित्येतदुपपादयति ॥ नहीति ॥ ज्ञाताद्वस्तुनोज्ञातान्यस्याव्यावृत्तिरभेदःकेनचिन्नहिशंक्यते । अतोयुक्तमित्यर्थः । भेदस्यभावस्वरूपत्वेभावज्ञानेतस्यापिज्ञातत्वात्संशयोनस्यादितिशंकायां केनचिदाकारेणसंशयोनस्यादितिवा सर्वाकारेणेतिवा विकल्पौ । नाद्यः । स्थाण्वादेःप्रतियोगित्वेनाज्ञातत्वादितिप्रथमपक्षपरिहारंहृदिनिधाय सर्वाकारेणसंशयोनस्यादितिद्वितीयपक्षमिष्टापादनेनदूषयति ॥ यदेति ॥ यदातुसंशीयतेतदापिकुतश्चिद्व्यावृत्तमेवज्ञायते नतुसर्वाकारेणेति । कुतइत्यतआह ॥ नहीति ॥ भेदस्यभावस्वरूपत्वेकिंचिद्दोषंपरिहृत्यसाध्यमर्थमाह ॥अतइति॥ अतः भेदस्यभावस्वरूपत्वेपिसंशयस्योपपत्तेर्व्यावृत्तिर्भावस्वरूपमेव । देवदत्तस्यवस्त्रमितिवदस्यभेदइतिभेदस्यवस्तुविशेष्यत्वान्नस्वरूपंभेदइतिशंकां शंकाबीजस्यानैकांतिकत्वेनपरिहरति ॥अस्येति॥ भेदाभावेपिस्वरूपस्वरूपिणोरस्यस्वरूपमितियथास्वरूपस्यविशेष्यत्वं तथाभेदाभावेष्यस्यभेदइतिभेदस्यवस्तुनोविशेष्यत्वमुपपद्यतइत्यर्थः । ननुभेदस्यभावस्वभावत्वात्भेदप्रतीतौधर्मित्वप्रतीतिर्धर्मित्वप्रतीतौभेदप्रतीतिरितिधर्मिभागेअन्योन्याश्रयाभावेपि प्रतियोगिप्रतीतौभेदप्रतीतिः भेदप्रतीतौप्रतियोगिप्रतीतिरिति प्रतियोगिभागेअन्योन्याश्रयःस्यादेवेत्यतआह ॥ यथेति ॥ ननुप्रतियोगिप्रतीतिसापेक्षप्रतीतिकोभेद स्तन्निरपेक्षप्रतीतिकभावस्वभावोनभवति विरोधादितिशंकामनैकांतिकत्वेनपरिहरति ॥ नहीति ॥ अस्तीतिब्रह्मेतिशेषः । अस्तिशून्यंवाब्रह्मेतिपृष्टवतोअस्तीतिनोत्तरं येन कालप्रतीतिसापेक्षप्रतीतिकायावर्तमानतायाःतन्निरपेक्षवस्तुस्वभावत्वदर्शनेनानैकांतिकत्वमुद्भाव्येत । किंनामसदित्युत्तरमित्य

SGDF
Sri Gargeshwari Digital Foundation

तआह ॥ सदिति ॥ सदित्यपि सदित्यस्यापिशब्दंतत्वात् शतुश्चलडर्थत्वात् लटश्चवर्तमानकालार्थत्वात् सत्त्वंकालसंबंध्येवानुभूयते । नब्रह्म तयोश्चैक्यं । अतउक्तानैकांतिकत्वतादवस्थ्यमित्यर्थः । शब्दंतस्यकालसंबंधित्वंनिदर्शनेनसमर्थयते ॥ तिष्ठन्निति वदिति ॥ एवंहेतुमनैकांतिकत्वेनदूषयित्वासिद्धमर्थमाह ॥ एवमिति ॥ प्रतीयमानंभेदस्वरूपं । ननुद्विपृथक्त्वंभेदस्तस्य द्विनिष्ठत्वाद्भावस्वरूपत्वेसर्वेषामेकत्वमापद्येतेत्यतआह ॥ अस्मादिति ॥ द्विपृथक्त्वंभेदइतिपक्षेभवतूक्तदोषः । नत्वेकपृथक्त्व इतिभावः । भेदस्यभावस्वरूपत्वेघटोभिन्नइत्यपर्यायव्यवहारविशेषोनस्यादित्येतदप्यनैकांतिकत्वेनपरिहरति ॥ ज्ञानेति ॥ भेदस्यस्वरूपत्वेभेदभेदिनोरन्यतरावशेषःस्यादित्येतत्प्रतिबंद्यापरिहरति ॥ नचेति ॥ विदारणात्मनोभेदस्यभावस्वरूपत्वेभावोपि शिष्येत । तथाचतत्राप्येवमितिनकिंचनैकंवस्तुस्यादित्यतआह ॥ अन्येति ॥ येननकिंचनैकंवस्तुस्यादितिप्रसंगोभवति । भेदोभावात्मेत्युक्तं । तत्रकेचित् भावात्मकोपिभेदस्तन्नाशेपिननश्यतीति । तन्मतंनिषिध्यभेदस्यभावात्मकत्वप्रतिपादकंप्रमाणंपठति ॥ भेदस्तिष्ठतीति ॥ नैजं संयोगवन्नागंतुकं । अव्ययत्वंगुरुत्वादिवद्यावद्द्रव्यभावित्वेनकिं नेत्याह ॥ नष्टानामपीति ॥ भावनाशेभेदानाशेतस्यतदात्मकत्वंनस्यादित्यतआह ॥ अवस्तुनइति ॥ अवस्तुनोनष्टस्यापिभेदः स्वरूपं भावस्वरूपमेव । प्राग्भेदस्यभावात्मकत्वस्यसिद्धत्वादितिभावः । भावात्मकभेदानाशेकथंभावनाशःस्यात् । भावनाशश्चास्त्येव । अतोभेदोननश्यतीत्यतःतद्घटयति ॥ विशेषेति ॥ विशेषरूपनाशेन पृथुबुध्नोदराकारत्वादिनाशेन । एवंपरपक्षमनूद्यनिषिध्यसिद्धांतमाह

॥ तत्राद्रुरिति ॥ घटप्रतियोगिकभेदात्मकपटनाशेघटस्यपटात्मकत्वंस्यादित्यतआह ॥ अविनष्टस्येति ॥ तस्मान्नष्टात् । प्रतियोगिनोनष्टत्वात्कथंभेदोस्तीतिचेन्न । प्रतियोगिसत्त्वस्यानुपयुक्तत्वात् तत्प्रतीतौचतत्प्रतीतेरेवोपयुक्तत्वादितिभावः । भेदोवस्तुस्वरूपमित्युक्तं सकिंभावात्मैवसर्ववस्तुस्वरूपमित्यतोनेत्याह ॥ एवमिति ॥ स्वरूपंभेदइतिशेषः । उत्तरार्धसंयोज्यपश्चादेवमितियोज्यं । एवंभावनाशेभेदोनश्यतीतिसिद्धांतंनिरूप्यपरमतंविकल्पेनदूषयति ॥ नष्टेति ॥ भेदोननश्यतीतिकोर्थः यदानष्टस्यवस्तुनःभेदोपिप्रध्वंसाभावात्माविद्यतइति तदेष्टं । प्रध्वंसांगीकारात् । तस्यवस्तुनोभेदत्वाभावात् । यदि नष्टस्यवस्तुनोभावात्माविद्यतइतितच्चायुक्तं । तदात्मवस्तुविनाशतइत्यर्थः । अन्योन्याश्रयादिदोषदुष्टत्वात्भेदोनवास्तवः । यःपश्चादस्तिनवेतिविचार्यतइत्यतआह ॥ स्वरूपत्वादिति ॥ भेदस्यभावस्वरूपत्वाद्धर्मिभेददूषणान्योन्याश्रयादेरलग्नत्वात् । उक्तरीत्यास्वरूपभेदोक्तदूषणालगनात् भेदेकस्यचिद्दूषणस्यशंकानेत्यर्थः । भेदस्यभावस्वरूपत्वंकुतइत्यतोभावस्यसर्वासंकीर्णतयानुभूयमानत्वादित्याशयवांस्तत्रसर्वाज्ञानेकथंसर्वासंकीर्णत्वज्ञानमित्याशंकायामाह ॥ सर्वमिति ॥ एवंभावादभावस्येत्यत्राभावस्यधर्मित्वप्रतियोगित्वेस्तइत्युक्तं । कैश्चित्तदनभ्युपगमात्तत्साधयितुंप्रतिजानीते ॥प्रतियोगितेति ॥ अपिशब्देनधर्मित्वंगृह्यते । प्रतियोगित्वादिर्भावरूपोधर्मः सकथमभावस्यस्यादित्यतआह ॥ अभावतयेति ॥ स्फुटमस्तीतिपूर्वत्रसंबध्यते । प्रतियोगित्वादिरभावस्याभावरूपतयास्त्यतोनोक्तदोषइत्यर्थः । नन्वभावोनिर्धर्मकोतःकथंतस्यधर्मइत्यतआह ॥ नहीति ॥ प्र

Sri Gargeshwari Digital Foundation

मेयत्वादिधर्मानुभवादितिहिशब्दार्थः । तुकारेणाभावस्यभावधर्मित्वेविरोधमाह । नन्वभावोस्तीत्यभावस्यभावस्येवास्तित्वंभाव धर्मःप्रतीयतइत्यतआह ॥ अभावस्येति ॥ एतदेवविशदमाह ॥ अभावतापिसैवेति ॥ अभावतापिअभावतैव सैवास्तिता भावरूपायाःतस्याअनानुभविकत्वादित्यर्थः । एवमन्योन्याश्रयादिदोषपरिहारेणभेददर्शनस्यसुकरत्वंप्रसाध्य सर्वव्यावृत्ततया अन्नमयादिपंचरूपब्रह्मज्ञानिनःउक्तंफलंविशदमाह ॥ अतइति ॥ भेदपक्षदोषाणापरिहृतत्वादितियावत् ॥ इतिद्वितीयव ल्लीसंपूर्णा ॥ २ ॥ वेदपुरुषोन्नमयादिपंचरूपिणोब्रह्मणउपास्तिमभिधायरुचिजननायसैवोपास्तिःपृष्टवतेभृगवेवरुणेनोक्तेत्याह ॥ भृगुर्वैवारुणिरित्यादिना ॥ अत्रविज्ञानमयानंदमयौग्राह्यौ । पूर्वत्रचक्षुःश्रोत्रवाचोग्राह्याः । उक्तार्थसमाख्यात्वात् । अधी हिभगवोब्रह्मेतिज्ञापनाच्च । ननुब्रह्मणःकिंलक्षणं यदन्नमयादिषुदृष्ट्वातानिब्रह्मेतिजानीयामित्यतआह ॥ तꣳहोवाचेति ॥ यतोवाइमानिभूतानिजायंतेतद्ब्रह्मेतिसंबंधः । जगज्जन्मादिकर्तृत्वंब्रह्मणोलक्षणमितिभावः । तद्विजिज्ञासस्व । तद्विषयांमी मांसांकुरु ॥ १ ॥ तपआलोचनंमीमांसामितियावत् । अन्नादि ब्रह्मेतिव्यजानात्इत्युक्तं । किमुपदिष्टंब्रह्मलक्षणंतेषुज्ञातं । ॐमित्याह ॥ अनाद्येवेत्यादिना ॥ अत्रचक्षुरादीन्यपिब्रह्मेतिव्यजानादित्यपिग्राह्यं । भार्गवी भृगुणानुष्ठिता । वारुणीवरुणे नोपदिष्टा । व्योमन् अच्छेद्यत्वादिनाव्योमनिभेपरमात्मनि । प्रतिष्ठिता । ब्रह्मशब्दात्ब्रह्मलक्षणभावाच्चक्षुरादीनांब्रह्मत्वंसि द्धमेव । तथापिचक्षुरादिशब्दानांभगवतिप्रवृत्तिनिमित्तंकिमित्यपेक्षायांनिरुच्यदर्शयति ॥ चक्षुःसचष्टइत्यादिना ॥

SGDF
Sri Gangadharji Digital Foundation

द्रष्टृत्वादिकंप्रवृत्तिनिमित्तमित्यर्थः । तपोब्रह्मेत्युक्तंवरुणेन तंशब्दंनिर्वक्ति ॥ तपोज्ञानस्वरूपत्वादिति ॥ सतपोतप्यतेत्या दिनिरशनत्वादिसंतापकतपसाव्यजानादितिप्रतीतिंनिवारयन्व्याचष्टे ॥ ज्ञानेति ॥ ज्ञानंज्ञातव्यं । यएवंवेदेत्यादिनाअन्ना दिब्रह्मज्ञानिनःप्रतिष्ठितत्वादिफलमुच्यते । ज्ञानिफलमेतत्कथंस्यादित्यतःतद्व्याचष्टे ॥ एवमिति ॥ शिष्याख्यप्रजयापशु भिश्चमहान्भवति ॥ २–७ ॥ अन्ननामाभगवान्प्रकृतस्तन्निष्ठाबह्वीर्विद्याःव्रतपूर्वमाह ॥ अन्नमित्यादिना ॥ तत्रैवंयोजना । प्राणःशरीरस्थितप्राणेस्थितः । प्राणनामाभगवान् । अन्नंअन्ननामकं शरीरमन्नादंशरीरलक्षणजीवप्रेरकंरूपमन्नादनामकं । एवंशरीरमन्नंप्राणोवाअन्नादइत्यपियोजनाद्रष्टव्येति । उभयोरुक्तमन्नत्वमन्नादत्वंचविशदमाह । प्राणेशरीरमित्यादिना ॥ ए वमुत्तरत्रापिव्याख्यानंद्रष्टव्यं । तत्रनकंचनवसतौप्रत्याचक्षीतेत्येतदप्रतीतेर्व्याचष्टे ॥ विद्यार्थइति ॥ वासेच्छया । प्राणोवाअन्न मित्यादिवाक्यजातंप्रसिद्धप्राणादिपरत्वप्रतीतिंनिवारयन्लेशतोव्याचष्टे॥सविष्णुरित्यादिना॥चतुरात्मभिःचतुरात्मनामभिः भोग्यत्वेहीनत्वंस्यादित्यतआह ॥ नचेति ॥ भोग्यस्यापिहीनत्वंकुतोनेत्यतआह ॥ नहीति ॥ अन्ननिंद्यात् अन्नंबहुकुर्वी तेत्येतद्व्याचष्टे ॥ अन्नाख्यमिति ॥ तस्मात्ज्ञातस्यान्नस्यप्रतिष्ठादिहेतुत्वात् । ययाकयापिविधयाअन्नंबहुमत्वाप्राप्नुयादिति वाक्यंव्याचष्टे ॥ येनेति ॥ अन्नंबह्वितिमन्यमानस्यान्नंसिद्ध्यत्येवेत्याह ॥ अराधीति ॥ तद्व्याचष्टे ॥ यइति ॥ भगवदुपा सनायासदाप्रयत्नःकार्यइतिभावेन सदाप्रयत्नवतः । कदाचित्प्रयत्नवतश्चफलेआह ॥ एतद्वैमुखतइत्यादिना ॥ मुखत

SGDF
Sri Gangadhara Digital Foundation

उपक्रमात् । बाल्यमारभ्येत्यर्थः । अप्रतीतेस्तद्वाक्यंव्याचष्टे ॥ यस्येत्यादिना ॥ पूर्वं प्रथमवयआरभ्यतीव्रोपासनयेतियावत् । मुखतःअग्रतः । पादमारभ्यशिरःपर्यंतंसर्वंरूपमाप्यते । पूर्ववयसिनिरंतरतीव्रोपासनयेतियावत् ॥ ८–११ ॥ भगवदुपासनांतराण्याह ॥ क्षेमइत्यादिना ॥ तद्व्याचष्टे ॥ क्षेमेत्यादिना ॥ मानुषीःमानुष्यःमनुष्यदेहसंबंधिन्यः । समाज्ञाउपास्तयः । अथदैवीरित्यस्यव्याख्यानमध्यात्मस्थइति । दैवीःदेवसंबंधिन्यः । तत्प्रकरणंव्याचष्टे ॥ अथेत्यादिना ॥ अथाधिदैवगतं हरिं । विद्युदितिवायौ । पशुषु पश्वभिमानिनि । प्रजातिःपुत्रः । संततिःसंतानपरंपरा । संततिरितिकस्यव्याख्यानमित्यतआह ॥ संततिरिति॥१२॥ आकाशेप्रकृतौसर्वमित्युपास्यइत्युक्तं । तत्रोपास्यान्गुणान्नाह ॥तत्प्रतिष्ठेत्यादिना॥ परिमरोमारकः। एनंपरि परितःस्थिताः द्विषंतोबाह्याः सपत्नावैरिणोम्रियंते । परि येप्रियाःभ्रातृव्याःशरीरस्थाअपियेभ्रातृव्याःतेचम्रियंते । तद्वाक्यजातंव्याचष्टे ॥ सप्रतिष्ठेत्यादिना॥ विरिंचमारकइतिमूलमनूक्तं ॥१३॥ वागादौवृष्ट्यादौस्थितःपरस्परभिन्नोनमंतव्यइत्याह ॥ सयश्चायमिति ॥ अन्नादिरूपभगवदपरोक्षज्ञानिनोमुक्तस्यतत्प्राप्तिःफलमुक्तमेतमन्नमयमात्मानमुपसंक्रामतीत्यादिना । इदानींतत्प्राप्तेरनंतरंमुक्तस्यस्थितिप्रकारमाह ॥ सयएवंविदित्यादिना ॥ एतत्सामेत्युक्तं सामैवनिर्देशेनाह ॥ हावित्यादिना ॥ हावित्यादित्रिवारमुक्तिःसामत्वात् सुखातिशयास्वादनाद्वा ॥ १४ ॥ ऋतस्यविष्णोःप्रथमजःपुत्रोहमस्मि । किं मनुष्येषुप्रथमजःपुत्रइत्यतोनेत्याह ॥ पूर्वंदेवेभ्यइत्यादि ॥ अमृतस्यमुक्तवर्गस्य । नाभाइनाभिराश्रयः । योमाददाति सइ

त् इत्थमेव । जीवन्मुक्तिदशायां । मामां । वाआगच्छति । अहंविश्वंसर्वंभुवनमभ्यभवमित्युक्त्या स्वातंत्र्यंप्रतीयते । तन्निवारयति । सुवर्णज्योतीरिति ॥ सुष्ठुपरमानंदोज्योतिःयस्यप्रेरकःअसौसुवर्णज्योतीरित्यर्थः । सयएवंविदित्यादिवाक्यजातं चतुर्मुखपरत्वाप्रतीतेरहमस्मिप्रथमजाऋतस्येत्यादिवाक्यानुसारेणव्याकरोति ॥ वेदैनमित्यादिना ॥ भोग्यतः । मुक्तस्वावरोपजीव्यत्वात् । अन्नोभोक्ताभगवदुपजीवकत्वात् । अहमन्नमन्नमदंतमाझीत्यस्यार्थः । विष्णोरन्नमिति । यएवंवेदेत्यस्यसुवर्णज्योतीरित्यनेनान्वयाप्रतीतेः । तंदर्शयति ॥ योहमिति ॥ अन्नंनपरिचक्षीतेत्येतदुर्वरितमर्थाप्रतीतेरनुवदन्व्याचष्टे ॥ अन्नंभगवंतमिति ॥ बहुमन्येततंसदेति व्याकृतत्वेपितात्पर्याप्रतीतेरन्नंबहुकुर्वीतेत्येतद्व्याकुर्वंस्तात्पर्यार्थमाह ॥ तद्व्रुणानिति ॥ ययाकयाचविधयेत्यत्रन्यायेनान्यायेनवान्नंप्राप्नुयादित्यन्यथाप्रतीयते । तन्निवारणायतदनुवदंस्तस्याभिप्रायमाह ॥ ययेति ॥ अहमस्मिप्रथमजाऋतस्य । अन्नमदंतमाझि । अहंविश्वंभुवनमभ्यभवामित्यस्यानुसारेणैतत्सामगायन्नास्तइत्यत्रसामगानकर्ताब्रह्मेतिव्याख्यातं । तद्युज्येत । यदिब्रह्मणःप्रथमजत्वान्नादातृत्वविश्वाभिभावकत्वानिसिद्ध्येयुः । असिद्धौचकथंतत्परतयाव्याख्यानमित्यतआह ॥ प्रजापतिरिति ॥ आत्मनात्मानमभिसंबभूवेतिअन्नमदंतमझीत्यस्यार्थमाह । अन्यस्याप्युक्तलिंगसद्भावेकथंब्रह्मैवात्रगानकर्तेतिसिद्ध्येदित्यतआह ॥ अन्यइति ॥ अत्रगानकर्ताब्रह्माचेत्कथं सयएवंवित् अस्माल्लोकात्प्रेत्येतिसामान्योक्तिर्घटतइत्यतोयएवंविदितिसामान्येनोक्तमपिब्रह्मणोतिज्ञानित्वाद्विशेषनिष्ठमेवभविष्यतीतिभावेन

Sri Gargeshwari Digital Foundation

मनुष्यादीनांज्ञानतारतम्यमाह ॥ विद्युद्रदित्यादिना ॥ १५ ॥ भाष्यंपरिसमाप्यांतेप्रचयादिहेतुमंगलाचरणमाचरति ॥ य स्येति ॥ समाद्यभावेहेतुमाह ॥ अनंतेति ॥ अनंतसच्छक्तित्वात्समाधिकरहितइत्यर्थः । मुमुक्षोर्यथाभगवज्ज्ञानमपेक्षितं त थासर्वथास्वज्ञानमप्यपेक्षितमित्याशयवान् स्वरूपंनिरूपयन्भाष्यकरणस्यप्रयोजनंभगवत्प्रीतिरेवेत्याह ॥ यस्येति ॥ प्रभौ प्रभुप्रीत्यर्थे । बलित्थेतिवेदवचनेयस्यत्रीण्युदितानिरूपाणीत्युक्त्या तत्सूक्तंवायुरूपपरमित्युक्तंभवति । लोकःप्रायेणाग्निपरमि तिमन्यते । अतोविप्रतिपत्तेःप्रमाणेनतद्व्याचष्टे ॥ हनुशब्दइति ॥ हनुशब्दोज्ञानवाची । तथाचहनुमान्ज्ञानवानित्युक्तंभव ति । सत्येवंहनुमानितिमतिशब्दितइतिचैकोर्थः । अनेनसूक्तेमतिशब्दोव्याख्यातः । गोप्यावाचस्तेनसीतांप्रत्यनयंत । रामप्रति पादकमूलरामायणवाचःस्तेनशिष्यप्रशिष्येषुअनयंतव्याकृताः । अनेन ऋतस्यधेनाअनयंतेत्येतद्व्याख्यातंभवति । भृतामायस्मि न्नसौभृतमोभीमइत्युक्तः । माश्चवाचः । ताएवमातृवद्धितरूपत्वान्मातरःस्मृताः । मास्ताःकाः । ऋगाद्याःसप्तप्रोक्ताः । अना शंकितदोषत्वाच्छिवाः । यतएवंभीमशब्दार्थःस्मृतः । ततःतत्रशयइतिभीमइतिचैकोर्थः । अनेन वपुर्नित्यआशयेद्वितीयमास प्तशिवासुमातृष्वितिव्याख्यातंभवति । मध्वशब्दस्यमध्वित्यादिनोक्तार्थत्वेनमध्वइति तृतीयामारुतीतनुरानंदतीर्थःइति चैको र्थः । अनेनसूक्तगतंमध्वपदं तृतीयपदंचव्याख्यातंभवति । ननुधकारोकारवकाराणांशब्दरूपत्वेमधुवइतिस्यात् नतुमध्वइति ॥ १६ ॥ यणादेशइतिचेत् सत्यं । उकाराविवक्षयातस्यपूर्वरूपत्वविवक्षयावाउपपत्तिः । वेदवित्वेदार्थवित् । तत्ववित् वेदरहस्यार्थवित्।

SGDF Sri Gargeshwari Digital Foundation

व्याख्यातमपिकिंचित्स्पष्टयन्विशिष्टपदव्याख्यानरूपंप्रमाणांतरंपठति ॥ साधकइति ॥ प्रथमोज्ञेयइत्यंतेन । यन्मतिर्हनुम न्नामकं प्रथमंवपुः । ऋतस्यसत्यवचसोरामस्य । उपह्वरते समीपेएववर्तते । स्वामिनःकार्याणिसाधतेच । सस्रुताः स्रवण सहिताः अभिलषितदात्र्यः । धेनाःधेनवःस्वामिनोवाचोयेनानयंतेतिव्याख्यातंभवति । बहुलस्यपितोरन्नस्यभुक् । वह्वन्नभो क्तेतियावत् । भीमइत्यारभ्यद्वितीयस्त्वित्यंतेन पृतनाक्षयकारित्वात्पृत्क्षः पृक्षनामकं । पितुमान्बह्वन्नभोक्तृद्वितीयंवपुः । सप्तशिवासुमातृषु नित्येनित्यं आशयेआशेते इतिव्याख्यातंभवति । दशप्रमतिपूर्णप्रज्ञशब्दयोरेकार्थत्वप्रकारंदर्शयति ॥ दशे ति ॥ दशेतिवैसर्वमिति दशेतिसर्वमुद्दिष्टं । सर्वंचसर्वंसमग्रंसंपूर्णमिति इहपूर्णमुच्यते । ततः दशप्रमतिशब्दस्यैवमर्थत्वात् । दशप्रमतिरितिपूर्णप्रज्ञःस्मृतः । तृतीयकइत्यादिना । अस्यवृषभस्यश्रेष्ठस्यवायोर्दशप्रमतिनामकंतृतीयंवपुः दोहसेज्ञानदोहनाय योषणोयोषितोजनयंतेतिव्याख्यातंभवति । आइत्यनूद्यसमंतादितिव्याख्यातं । गूढत्वमेवहेतूक्त्याविवरीतुमुक्तं ॥ असत्यमि ति ॥ अनेन प्रदिवःप्रदीप्तोमातरिश्वामध्वः यदींयस्मादेवकारणात् गुहासंतंगूहितंसंतंअनुमथायति । मन्नातीतिव्याख्यानेन ऋगाद्यर्थतयाप्रकटीकरोतीतिव्याख्यातंभवति ॥ येनेत्यादिना ॥ यस्मादेवबुध्नात् मूलभूतात् व्याचक्षाणात्मध्वात् ईशाना सः । शिवाद्याःसूरयोज्ञानिनो महिषस्य महितषङ्गुणस्यविष्णोःवर्पसःबलादिगुणान् शवसासुखेनैव निरक्रंतनिरजानंतेतिव्या ख्यातंभवति । समग्रसूक्तव्याख्यानंतु । भारतभावपंचिकायांद्रष्टव्यं । त्रीणिरूपाणिकदोत्पन्नानीत्यपेक्षायामाह ॥ त्रेताया

SGDF
Sri Gargeshwari Digital Foundation

मिति ॥ स्वमहिमोक्त्यावसानमसहमानोभक्त्यतिशयंद्योतयन्भगवत्स्तुतिप्रणामाभ्यांसमापयति ॥ पूर्णेति ॥ पूर्णोदारगुणा एवधाममूर्तिर्यस्यसतथोक्तः । तस्मैवेधसे । परमज्ञानिनेइत्यशेषमतिमंगलं ॥ संपूर्णसंविदानंदमुखसर्वगुणात्मकं । रमारमणमिष्टार्थप्रपद्येमध्वबल्लभं ॥ ७ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचिततैत्तिरीयोपनिषद्भाष्यविवरणंजयतीर्थपूज्यचरणशिष्यव्यासतीर्थकृतंसंपूर्णं ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागर-
मुद्रणालये मुद्रयित्वा प्रकाशितः. शके १८२६, सन १९०५.

SGDF
Sri Gargeshwari Digital Foundation

॥ तैत्तिरीयव्यासतीर्थीयटीकासंपूर्णा ॥

GDF
Sri Gargeshwari Digital Foundation